**ईक्षणम्** [ ईक्ष्-ल्युट् ] 1 Seeing, beholding &c. -2 A look, sight, aspect, view. -3 An eye; अश्रुपूर्णाकुलेक्षणम् Bg. 2. 1. इत्यद्रिशोभाप्रहितेक्षणेन R. 2. 27; so अलसेक्षणा. -4 Regarding, looking after, caring for. -**श्रवस्** *m.* A serpant; एषा नो नैष्ठिकी बुद्धिः सर्वेषामीक्षणश्रवः Mb. 1. 37. 29.

**ईक्षणिकः** [ ईक्षण-ठन् ] A fortune-teller; मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह Ms. 9. 258. -**का** A female fortune-teller.

**ईक्षतिः** [ ईक्ष्-शतिप् ] Looking, sight; ईक्षतेर्नाशब्दम् Br. Sūt. 1. 1. 5.

**ईक्षा** [ ईक्ष्-अ टाप् ] 1 Sight. ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा Bhāg. 8. 6. 37. -2 Viewing, considering; Bhāg. 7. 11. 8. -3 Knowledge of soul (आत्मविद्या); Bhāg. 7. 6. 26.

**ईक्षिका** 1 An eye. -2 A glance, look; Pt. 5.

**ईक्षित** *p. p.* Seen, beheld, regarded &c. -**तम्** 1 A look, sight. -2 An eye; अभिमुखे मयि संहृतमीक्षितम् Ś. 2. 12.

**ईक्षितृ** *a.* [ ईक्ष्-तृच् ] Seeing, beholding, a beholder.

**ईक्षेण्य** *a* Ved. Deserving to be seen; curious. ईक्षेण्यासो अह्यो न चारवो Rv. 9. 77. 3.

**ईख्-ईङ्ख्** 1 P. ( ईङ्खति, ईङ्खाञ्चक्रे, ईङ्खितुम्, ईङ्खित ) To go, move, vacillate. -*Caus.* 1 To move backwards and forwards, swing, oscillate. -2 To shake, cause to tremble.

**ईज्-ईञ्ज्** 1 Ā. 1 To go. -2 To censure, blame.

**ईजान** *a.* [ यज् कानच् ] Performing sacrifices. One who has sacrificed; यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् Kath. 1. 3. 2.

**ईजिकाः** N. of a people; Mb.

**ईड्** 2 Ā. ( ईट्टे, इडाञ्चक्रे, ऐडिष्ट, ईडितुं, ईडित ) 1 To praise; अग्निमीडे पुरोहितम् Rv. 1. 1. 1; शालीनतामव्रजदीड्यमानः R. 18. 17; नेडिषे यदि काकुत्स्थम् Bk. 9. 57, 18. 15. -2 To implore, request, ask for ( with two acc. ); उपस्थाय मातरमन्नमैट्टे Rv. 3. 48. 3. -*Caus.* 1 To ask. -2 To praise.

**ईड्** *f.* 1 Refreshment, libation. -2 Praise, extolling; Rv. 8. 39. 1.

**ईडनम्** [ ईड्-ल्युट् ] Praising.

**ईडा** [ ईड्-अ-टाप् ] Praise, commendation.

**ईडे (ळे) न्य** Ved. = ईड्य.

**ईड्य** *pot. p.* To be praised or glorified, praiseworthy, laudable; ब्रह्मजज्ञं देवमीड्यं विदित्वा Kath. Up. 1. 17. भवन्तमीड्यं भवतः पितेव R. 5. 34; प्रसादये त्वामहमीशमीड्यम् Bg. 11. 44.

**ईणमत्** *a.* [ ईट्-अस्त्यस्य मतुप् ] Having a lord or master.

**ईति** *a.* [ ई-क्तिच् ] 1 Produced, effected. -**तिः** *f.* Plague, distress, a calamity of the season. The *itis* are usually said to be six :-(1) excessive rain; (2) drought; (3) locusts; (4) rats; (5) parrots; and (6) foreign invasions; अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः। प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥ ( some read for the second line स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः ॥ making the total number seven ); आशास्यमीतिविगमप्रभृति प्रजानाम् M. 5. 20; Mv. 7. 42; निरातङ्का निरीतयः R. 1. 63. -2 An infectious disease. -3 Travelling ( in a foreign country ), sojourning ( प्रवास ). -4 An affray.

**ईदृक्ष-श** *a.* (-**क्षी-शी** *f.*), also ईदृश् Such, of this kind, of this aspect, endowed with such qualities. -**क्** *n.* Such a condition; such occasion; लभन्ते युद्धमीदृशम् Bg. 2. 32; 6. 42; 11. 49.

**ईदृक्ता** Quality ( Opp. इयत्ता ); विष्णोरिवस्यानवधारणीयं ईदृक्तया रूपमियत्तया वा R. 13. 5; मामीदृक्तया जानाति knows me to be so.

**ईन्त्** 1 P. To bind; cf. अत.

**ईप्सनम्, ईप्सा** [ आप्तुमिच्छा आप्-सन्-अ ] 1 Desire to obtain. -2 A wish, desire.

**ईप्सित** *a.* Desired, wished for, dear to; अपीप्सितं क्षत्रकुलाङ्गनानाम् R. 14. 4; Ś. 3. 14. -**तम्** Desire, wish. -**फलम्** A kind of sweet Cocoanut ( Mar. मोहाचा नारळ ).

**ईप्सु** *a.* Striving to obtain, wishing or desiring to get ( with acc. or inf. but usually in comp. ); सौरभ्यमीप्सुरिव ते मुखमारुतस्य R. 5. 69. काम° Bg. 18. 24. धन° &c. -**Comp.** -**यज्ञः** a particular Soma sacrifice.

**ईम्** *ind.* [ ई-बा० मुच् ] Ved. 1 A particle of affirmation or restriction; usually after short words at the beginning of a sentence, after यत्, relative pronouns prepositions and particles like उत, अथ &c.; प्र यदीमुवाचेति Bri. Up. 2. 5. 16. -2 Now. -3 This, here ( एनम् ).

**ईय** [ ई-बा० क्यप् ] Pervading; °चक्षस् of pervading sight.

**ईर्** 2 Ā. ( ईर्ते, ईराञ्चक्रे, ऐरिष्ट, ईरितुम्, ईर्ण ); also 1 P. ( *p. p.* ईरित ) 1 To go, move, shake ( trans. also ). -2 To rise, arise or spring from. -3 To go away, retire. -4 To agitate, elevate; raise one's voice. -10 U. or -*Caus.* ( ईरयति, ईरित ) 1 To agitate, throw, cast; Śi. 8. 39; discharge, dart, hurl; ऐरिरच्च महाद्रुमम् Bk. 15. 52; R. 15. 20. -2 To excite, prompt, urge; क्षेमंकरेऽर्थे मुहुरीर्यमाणः Bk. 12. 6. -3 To cause to rise, produce. -4 To utter, pronounce, proclaim, say, repeat; Māl. 1. 25; इतीरयन्तीव तया निरैक्षि N. 14. 21; Śi. 9. 69; Ki. 1. 26; R. 9. 8; निबोध चेमां गिरमीरितां मया. -5 To cause to go, set in motion, move, shake; वातेरितपल्लवाङ्गुलिभिः Ś. 1; अपरागसमीरणेरितः Ki. 2. 50; Śi. 8. 20. -6 To draw towards, attract; उद्धतैरिव परस्परसङ्गादीरितान्युभयतः कुचकुम्भैः Śi. 10. 32. -7 To employ, use. -8 To bring to life, revive. -9 To elevate. -To raise oneself ( Ā ).

**ईरः** Wind. -**जः, पुत्रः** N. of Hanumat.

**ईरण** *a.* [ ईर्-ल्युट् ] Agitating, driving. -**णः** The wind. -**णम्** 1 Agitating, moving, driving. -2 Going. -3 = इरण q. v.